महावि॰ का नाम

अ॰ वि॰ से महावि॰ रहीमपुर, रक्सौल।
दिनाङ्क - २५.५.२०२१
उपशास्त्री द्वितीय वर्ष
व्याकरण
भाग - ३।

विषय - तत्पुरुष समास प्रकरणम्।
स्थाल्यादिचतुर्थ्यन्त वाच्य पाकार्थत्वेऽपि प्रकृति विकृति भावग्रहणस्य प्रयोजनमाह - नेहेति। 'रन्धनायेति'। पाकायेत्यर्थः पक्वाय इत्यर्थः। 'रध हिंसायाम्'। इह पाको विवक्षितः। भावे ल्युट्, अनादेशः। 'रधिजभोरचि', इति नुम्। स्थाल्यादिचतुर्थ्यन्त वाच्य पाकार्थत्वेऽपि प्रकृति व विकृति भाव विरहान्न समासः। ननु अश्वेभ्यो घासः - अश्वघासः, धर्माय नियमो धर्मनियम इत्यादौ कथं तदर्थेन समासः, प्रकृति विकृति भाव विरहादित्य आह - 'अश्वघासादयस्तु षष्ठी समासा' इति। न चैवं रन्धनाय स्थाल्यादित्यत्रापि षष्ठी समासः रन्धनादेरिति प्रकृति विकृति भाव नियमो व्यर्थ इति वाच्यम्, शाब्दबोधे संबन्धत्वेन तादर्थ्यस्य तत्र वैलक्षण्येन उक्त नियम साफल्यात्। एवं च रन्धनस्य स्थालीति संबन्धत्वेन भाने षष्ठ समास इष्ट एव। तादर्थ्यत्वेन भाने चतुर्थी समासवारणाय तु प्रकृति विकृति भाव नियमाश्रयणमित्यास्तां तावत्। तदेवं तदर्थेत्यत्राः प्रपञ्चितः। अथेदानीमर्थ-शब्देन चतुर्थ्यन्तस्य समासे विशेषमाह - 'अर्थेनेति'। अर्थ शब्देन चतुर्थ्यन्तस्य नित्य समास इति वक्तव्यम्। अन्यथा विभाषाधिकारादिकल्पः स्यात्। विशेष्यस्य प्रधानस्य यल्लिङ्गं तल्लिङ्गमित्यपि

वक्तव्यम्। अन्यथा अर्थ शब्दस्य नित्यं पुँल्लिङ्गत्वात् परवल्लिङ्गम्' - इति सर्वत्र पुँल्लिङ्ग एव स्यादित्येवः। अर्थ शब्दोऽत्र वस्तुपरः। अर्थोऽभिधेयरैवस्तु प्रयोजन निवृत्तिषु' इत्यमरः। इह उपकारकं वस्तु विवक्षितमित्यपि प्रत्यादहरति - द्विगायार्थं द्विगार्थः सूप इति। अर्थ द्विगायायमित्यस्य पद विग्रहः। तत्र अर्थ शब्दस्थाने अर्थमिति शब्दः, नित्यसमास-हेतोरस्य पद विग्रहो चिन्त्यः। द्विगायेति तादर्थ्य चतुर्थी तदन्तस्य अर्थ शब्देन समासः, विशेष्य सूप शब्दस्य पुँल्लिङ्गत्वात् समासस्य पुँल्लिङ्गता च। द्विगस्य उपकारकः सूप इत्यर्थः। 'द्विगार्थं यवागूरिति'। द्विगायेयमिति विग्रहः। अर्थ शब्दस्य नित्य-पुँल्लिङ्गत्वेऽपि 'परलिङ्गम्' - इति पुँल्लिङ्गं वाच्यत्वा अनेन विशेष्यलिङ्गानुसारेण स्त्रीलिङ्गता। द्विगार्थं पय इति। द्विगायेदमिति विग्रहः। अत्र विशेष्य-लिङ्गानुसारान्नपुंसकत्वम्। भाष्ये तु चतुर्थ्यैव तादर्थ्यस्योक्तत्वाद् उक्ताधार्नाम प्रयोगः' इति न्यायेन अर्थ शब्देन विग्रहप्रसक्तेर्नित्यसमासत्वं न्याये सिद्धमेव। गुरोरिदं गुर्वर्थ मित्यादाविव लिङ्गमपि लोकत एव सिद्धमिति वार्तिकमिदं प्रत्याख्यातम्। 'भूतबलिरिति'। भूतेभ्यो बलिरिति विग्रहः। तादर्थ्यचतुर्थ्यन्तस्य बलिशब्देन समासः। 'गोहितमिति'। गोभ्यो हितमिति विग्रहः। गवा-मनुकूलमित्यर्थः। 'हितयोगे च' इति शेष षष्ठ्या-पवाद चतुर्थी। तदन्तस्य हितशब्देन समासः। गोरक्षितमिति। तृणादिकमिति शेषः।

NOTES गोभ्यो रक्षितमिति विग्रहः

दिनेश प्रसाद सिंह
(एसोसियेट प्रोफेसर
(व्याकरण)